Serial Number

| Roll No. | |
|---|---|

Total No. of Questions : 23

Total No. of Printed Pages : 7+1 Blank

# S-103

हाईस्कूल मुख्य परीक्षा वर्ष - 2022

High School Examination (Main) - 2022

## संस्कृत

## SANSKRIT

Time : 3 Hours ] [ Maximum Marks : 80

निर्देश :

(i) सर्वे प्रश्नाः अनिवार्याः सन्ति ।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

(iii) प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि ।

1 रिक्तस्थानानि पूरयत् - 1×7=7

(चतुरः, क्तवतु, टाप्, गीतानि, तुमुन, विशालः, ल्यप्)

(क) 'आदाय' इत्यस्य पदे ________ प्रत्ययः अस्ति ।

(ख) 'हसितुम्' इत्यस्य पदे ________ प्रत्ययः अस्ति ।

(ग) 'गतवान्' इत्यस्य पदे ________ प्रत्ययः अस्ति ।

(घ) 'अजा' इत्यस्मिन् पदे ________ प्रत्ययः अस्ति ।

(ङ) विशालः ग्रामः इत्यस्मिन् पदयोः ________ विशेषणम् अस्ति ।

(च) मधुराणि गीतानि इत्यस्मिन् पदयोः ________ विशेष्यम् अस्ति ।

(छ) चतुरः काकः इत्यस्मिन् पदयोः ________ विशेषणम् अस्ति ।

2 एक पदेन उत्तरं लिखत – 1×7=7

(क) 'सलिलम्' इत्यस्य पदे पर्यायः भवति ?

(ख) 'आम्रम्' इत्यस्य पदे पर्यायः भवति ?

(ग) 'दानवाय' इत्यस्य पदे विलोम पदम् भवति ?

(घ) 'दूषितम्' इत्यस्य विलोम पदम् भवति ?

(ङ) सर्वदा सर्वकार्येषु का बलवती ?

(च) मनुष्यानां महान् रिपुः कः ?

(छ) पिता पुत्राय बल्ये किं यच्छति ?

3 उचितं विकल्पं चित्वा लिखत – 1×6=6

(क) 'फलानि' इत्यस्य पदे वचनम् अस्ति ?

(i) एकवचनम् (ii) बहुवचनम्

(iii) द्विवचनम् (iv) अन्यवचनम्

(ख) 'गृहात्' इत्यस्मिन् पदे विभक्ति अस्ति –

(i) प्रथमा (ii) तृतीया

(iii) पञ्चमी (iv) षष्ठी

(ग) 'राज्ञे' इत्यस्य पदे कः विभक्ति अस्ति ?

(i) चतुर्थी (ii) पञ्चमी

(iii) षष्ठी (iv) सप्तमी

(घ) 'बालकम्' इत्यस्मिन् पदे विभक्ति अस्ति –

(i) प्रथमा (ii) द्वितीया

(iii) तृतीया (iv) चतुर्थी

(ङ) 'प्रयत्नः' इत्यस्मिन् पदे उपसर्गः अस्ति –

(i) प्रय (ii) प्र

(iii) यत्नः (iv) नः

(च) 'पराजयते' इत्यस्मिन् पदे उपसर्गः अस्ति –

(i) पराजय (ii) जयते

(iii) परा (iv) पराज

4 शुद्धवाक्यानां समक्षम् आम् अशुद्धवाक्यानां समक्षम् न इति लिखत – 1×6=6

(क) 'पठति' इत्यस्मिन् पदे लट्लकारः अस्ति ।

(ख) 'अपठताम्' इत्यस्मिन् पदे एकवचनम् अस्ति ।

(ग) 'हनिष्यति' इत्यस्मिन् पदे प्रथम पुरुषः अस्ति ।

(घ) 'हताम्' इत्यस्मिन् पदे लृट्लकारः अस्ति ।

(ङ) 'कच्छपः' शनैः शनैः चलति ! इत्यस्य वाक्ये अव्ययं न अस्ति ।

(च) विद्या माता एव रक्षति । इत्यस्य वाक्ये एव अव्ययं अस्ति ।

5 युग्ममेलनं कुरूत – 1×6=6

| | (अ) | (ब) |
|---|---|---|
| (i) | अनुरूपम् | द्विगु |
| (ii) | चौरात् भयम् | सत् + जनः |
| (iii) | पञ्चवटी | मनोरथः |
| (iv) | सज्जनः | अव्ययीभावः |
| (v) | मनः+रथः | गणेशः |
| (vi) | गण+ईशः | पञ्चमी तत्पुरुषः |

अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृत भाषायाम लिखत –

6 कविः किमर्थं प्रकृतेः शरणम् इच्छति ? 2

अथवा

बुद्धिमती केन उपेता पितुर्गृहं प्रति चलिता ?

7 कीदृशं कर्म व्यायामसंज्ञितम् कथ्यते ? 2

अथवा

जरा कस्य सकाशं सहसा न समधिरोहति ?

8 कृषकः किं करोति स्म ? 2

अथवा

माता सुरभिः किमर्थम् अश्रूणि मुञ्चति स्म ?

9 यदि राजा सम्यक् न भवति तदा प्रजा कथं विप्लवेत ? 2

अथवा

मयूरः कथं नृत्यमुद्रायां स्थितः भवति ?

10 निर्धनः जनः कथं वित्तम् उपार्जितवान् ? 2

अथवा

जनः किमर्थं पदातिः गच्छति ?

11 समस्तराष्ट्रं कीदृशे उल्लासे मग्नम् आसीत् ? 2

अथवा

भूकम्पस्य केन्द्रबिन्दुः कः जनपदः आसीत् ?

12 वाच्यपरिवर्तनं कुरूत – (कोऽपि द्वौ) 1×2=2

(क) बलबता विरूद्धमपि भोजनं पाच्यते । (कर्तृवाच्यम्)

(ख) कः छायां निवारयति । (कर्मवाच्ये)

(ग) लतया गीतं गीयते । (कर्तृवाच्ये)

13. अधोलिखितानि वाक्यानि कः कं प्रति कथयति – (कोऽपि द्वौ) 1×2=2

(क) यदि एवं तर्हि मां निजगले बद्ध्वा चल–सत्वरम् । ____ कः ____ कम् ____

(ख) गच्छ, गच्छ जम्बुक । ____ कः ____ कम् ____

(ग) रेरे धूर्त त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा । ____ कः ____ कम् ____

14 स्थूलपदमाधृत्य प्रश्ननिर्माणं कुरूत – (कोऽपि द्वौ) 1×2=2

(क) शरीरस्य आयासजननं कर्म व्यायामः इति कथ्यते ।

(ख) आत्महितैषिभिः सर्वदा व्यायामः कर्तव्यः ।

(ग) गात्राणां सुविभक्तता व्यायामेन संभवति ।

15 अधोलिखितेषु अशुद्धकारकवाक्यानां शुद्धिः करणीयाः – (कोऽपि द्वौ) 1×2=2

(क) वृक्षस्य पत्राणि पतति ।

(ख) सीता रामस्य सह वनं गच्छति ।

(ग) माता बालकम् दुग्धं ददाति ।

(घ) शिवं नमः ।

16 अधोलिखितम् गद्यांशम् सम्यक पठित्वा प्रश्नानाम् उत्तराणि संस्कृत भाषायां लिखत– 3

वनस्य दृश्यं समीपे एवैका नदी वहति । एकः सिंहः सुखेन विश्राम्यति, तदैव एकः वानरः आगत्य तस्य पुच्छं धुनाति । क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढः । तदैव अन्यस्यात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति । एवमेव वानराः वारं वारं सिंहं तुदन्ति । https://www.mpboardonline.com

प्रश्नाः –

(i) वनस्य दृश्यं समीपे का वहति ?

(ii) कः सुखेन विश्राम्यति ?

(iii) कः सिंहस्य पुच्छं धुनाति ?

अथवा

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान् । तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः । तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत । एकदा स पिता तनूजस्य रूग्णतामाकर्ण्य व्याकुलो जातः पुत्रं दृष्टुं च प्रस्थितः ।

प्रश्नाः –

(i) निर्धनः जनः कथं वित्तम् उपार्जितवान् ?

(ii) वित्तेनार्जितम् स्वपुत्रम् कुत्र प्रवेशं दापयितुं सफलो जातः ?

(iii) तत्तनयः कुत्र निवसन् अध्ययने संलग्नः समभूत् ?

17 अधोलिखितम् पद्यांशं सम्यकः पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां **लिखत** –

प्रजासुखे सुखं राज्ञः, प्रजानां च हिते हितम् ।
नात्मप्रियं हितं राज्ञः, प्रजानां तु प्रियं हितम् ॥

**प्रश्नाः** –

(i) प्रजासुखे सुखं कः ?

(ii) कः प्रजानां च हिते हितम् ?

(iii) नात्मप्रियं हितं कः ?

**अथवा**

गुणी गुणं वेत्ति न वेत्ति निर्गणो,
बली बलं वेत्ति न वेत्ति निर्बलः ।
पिको वसन्तस्य गुणं न वायसः,
करी च सिंहस्य बलं न मूषकः ॥

**प्रश्नाः** –

(i) गुणी किं वेत्ति ?

(ii) बली किं वेत्ति ?

(iii) सिंहस्य बलं किं न जानति ?

18 अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण लिखत

(क) व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच अधुना एकमेव व्याघ्रः विभज्य भुज्यताम् ।

(ख) बुद्धिमती पुत्रद्वयेन उपेता पितुर्गहं प्रति चलिता ।

(ग) मार्गे सा एकं व्याघ्रम् अपश्यत् ।

19 **प्रदत्तै** शब्दैः रिक्तस्थानपूर्तिं कुरूत (कोऽपि त्रयः)

अपि, भृशम्, बहिः, एवं, सदृशं, सहसा

(i) पर्यावरणस्य संरक्षणम् ________ प्रकृतिः आराधना ।

(ii) व्यायामेन ________ किञ्चित स्थौल्यापकर्षणं नास्ति ।

(iii) व्यायामिनः जनस्य सकाशं वार्धक्यं ________ नायाति ।

(iv) इदानीं वायुमण्डलं ________ प्रदूषितमस्ति ।

(v) प्राकृतिक वातावरणे क्षणं सञ्चरणम् ________ लाभदायकं भवति ।

(vi) भूकम्पित समये ________ गमनमेव उचितं भवति ।

20 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्य पुस्तकस्य सुभाषितद्वयं लिखत । 4

21 स्वप्राचार्यस्यकृते अवकाशार्थम् एकं प्रार्थनापत्रम् संस्कृतभाषायां लिखत । 4

**अथवा**

स्वभ्रातुः जन्मदिनोत्सवस्य कृते स्वमित्राय आमन्त्रणपत्रम् संस्कृते लिखत ।

22 अधोलिखितम् अपठितं गद्यांश सम्यक पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत – 4

शरीरं धर्मस्य प्रथमं साधनम् अस्ति – 'शरीरमाद्यं खलु धर्मसाधनम्' शरीरस्य आरोग्यं व्यायामेन सिध्यति । यः व्यायामं करोति तस्य प्राणशक्तेः आपदः स्वयमेव दूरं गच्छन्ति । व्यायामेन शरीरे शुद्धरक्तसञ्चारः भवति । इन्द्रियाणि सुस्थानि स्वस्थानि च भवन्ति जठराग्निः दीप्तः भवति । परिवृद्धम् उदरं सङ्कोचं गच्छति मस्तिष्कम् उर्वरं भवति । अस्मिन् लोके जनैः वयोऽनुसारं कोऽपि व्यायामः अवश्यं करणीयः विद्यार्थिजीवने तु व्यायामस्य विशेषः महत्वः अस्ति । व्यायामेन अपि विद्यार्थीनां भविष्यनिर्माणं भवति ।

(i) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत ।

(ii) शरीरं कस्य प्रथमं साधनम् ?

(iii) मस्तिष्कम् किं भवति ?

(iv) कानि सुस्थानि स्वस्थानि च भवन्ति ?

23 अधोलिखितेषु विषयेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत – 4

(i) संस्कृतभाषायाः महत्वम् ।

(ii) छात्रजीवनम् ।

(iii) महाकविः कालिदासः ।

(iv) पर्यावरणम् ।